पः जीवव्यूहो मनुष्यपशुपक्षिसरीसृपादिरूपः अतीदेतोशेषः शेषीति संबंधः गुणप्रधानभावः
हृ२

सौं. टी. २९

वंपुवयोः साधारण्येन यातुल्यतया स्थिताः कीदृशयोः समरसपरानंदरसयोः समरसेनैकात्म्येन यः परानंद
उत्कृष्टनिर्वृतिलक्षणस्तयोस्तदधीनयोस्तत्स्वरूपयोः नवात्मानमित्यत्र भवात्मानमित्यपि क्वचित्पाठः भ
वः शिवः ३४ मनस्त्वं व्योम त्वं मरुदसि मरुत्सारथिरसि त्वमापस्त्वं भूमिस्त्वयि परिणतायां न हि परं
त्वमेव स्वात्मानं परिणमयितुं विश्ववपुषा चिदानंदाकारं शिवयुवतिभावेन बिभृषे ॥ ३५ ॥ हे शिव
युवति त्वं मनोऽन्तःकरणमसि व्योमाकाशमसि मरुद्वायुस्त्वमसि मरुत्सारथिरग्निस्त्वमसि आ
पो जलं भूमिः पृथिवी त्वयि परिणतायां सत्यां परं भिन्नं कार्यं नास्ति त्वमेव भावेन लीलाविशे
षेण चिदानंदाकारमात्मानं विश्ववपुषा जगद्रूपेण बिभर्षि किमर्थं परिणमयितुं परिणामं प्राप
यितुं तदुक्तं चलत्वप्रस्तावे त्रिपुरपरमा शक्तिराद्या जाता महेश्वरी स्फुरत्ता स्वभावेन त्रैलोक्य
त्रिमातृका कवलीकृतनिःशेषतत्त्वग्रामस्वरूपिणी यस्यां परिणतायां तु न किंचित्परिशिष्य
त इति अथ मानसादि सद्भूतत्वानामन्वयशो भवानां त्वय्येव तौ देवदेवौ प्रति चक्रे कियद्भिः श्लो
कैः स्तौति ३५ तवाज्ञाचक्रस्थं तपनशशिकोटिद्युतिधरं परं शंभुं वन्दे परिमिलितपार्श्वं प
रचिता यमाराध्यन्भक्त्या रविशशिशुचीनामविषये निरालोकेऽलोके निवसति हि भालो
कभुवने ३६ ॥ तवाज्ञाचक्रस्थं ललाटमध्यस्थितं भ्रूमध्यस्थं तपनः सूर्यः शशी चंद्रस्तयोः कोटिसंख्या २९

ककांतिधरं परशंभुं परशंभुनाथाख्यं परबिंदुपरबिंदुपरचिद्रूपयोर्वयापरिमिलितपार्श्वपरिख्य
केवानवाच्यंमन्ये जानामि यं शंभुभक्त्या स्वाराध्यन्स्वरूपं लोको भक्तजनो नालोकभवने स्थितलोक
गृहे हि निस्थितं वसति कीदृशे निरालोके स्वप्रकाशालोकांतरश्च नेस्वप्रकाश इत्यर्थः तथा च श्रुतिः
न तत्र सूर्यो भाति न चंद्रतारकं नेमा विद्युतो भांति कुतोयमग्निः तमेव भांतमनुभाति सर्वं तस्य भा
सा सर्वमिदं विभाति इति तत्र कर्णिकायां परशंभुनाथश्रीपादुकां पूजयामीति संबन्धः चतुःषष्टिद
लेषु पूर्वोक्त चतुःषष्टिरश्मयः नाथश्रीपादुकां पूजयामि इत्येतैः पूजनीयाः एवमन्यचक्रेष्वपि
क्रमः क्रमप्राप्तनामरश्मिमुख्यदेवैर्देव्यो ज्ञेया इति २६ विशुद्धौ तत् कुस्फटिकविसदं व्योमतन्न
कं शिवं सवेदेवामपार्श्वे [illegible] व्योमनिलं यथाः कं [illegible] किरणैः [illegible] रूपसर
विधृतां तद्ध्यातां विसति चक्रनाथजगतां २७ ॥ तेन वाधिष्ठानभूतं विशुद्धौ कंठस्य षोडश
दलचक्रे स्फाटिकवद्विशदं स्वच्छं व्योमजनकं गगनकारणं शिवं व्योमेश्वरं व्योमेश्वर्याख्यायाश्च वहितं
त्याकांत्या भासा जगतीजगदर्तिवीजसंततिः चकोरी वा विलसती शोभते कीदृशी प्राशी किरणेन सा
नूष्यासमानासरणिः स्वमुमार्गाद्रुतिय स्वाततया श्रुतएवंविधतां तद्ध्यांतानि रत्नाकरविषयव्या
संगतिमिरेत्यर्थः कंठेकमलकर्णिकायां व्योमेश्वनाथश्रीपादुकां पूजयामि व्योमेश्वर्याम्बाश्रीपादु
कां पूजयामीति संबन्धः पत्रेषु षोडश समतीरश्मयः आनंदनाथश्री पादुकां तरं वा श्रीपादुकां पूजयामि

त्तिसंपूज्यपरितोनाभस्यारश्मयः पूज्याश्चेतिक्रमः ॐमप्राप्तवायव्यरश्मिदेवदेव्यावाह १७ समुन्मी
लत्संवित्कमलमकरंदैकरसिकं भजे हंसद्वंद्वं किमपि महतां मानसचरं पदात्तापादत्तादशगुणित
विद्यापरिणति यदादायत्ते दोषाद्गुणकमलमद्भ्यः पयइव १८ समुन्मीलत्तीप्रकाशमानायां
विद्रुमलतानेतदेवकमलंपमंतस्य मकरंदलत्र रसिकं महतां योगिनां मानसमेव मानसं तत्रचरती
ति ग्रतएवकिमप्यनिर्वचनीयं हंसद्वंद्वं हंसेश्वरहंसेश्वररूपं भजे हंसः सोहं स्वाहा परमहंस हंसेश्व
रनाथश्रीपादुकां पादुकां पूजयामि सोहं हंसः स्वाहा परमहंसपरमहंसेश्वरीवापादुकां पूजयामीति
तयोर्भजनमंत्रः हंसद्वयं हारहृदयं वा तन्मंत्रः पदात्तापाद्ययोरुच्चारणादष्टादशभ्यस्तितानां अष्टादश
संख्याकानां विद्यानां वेदचतुष्टयोपवेदचतुष्टयषडंगपुराणन्यायमीमांसाधर्मशास्त्ररूपाणां परिण
तिः प्रकाशः हंससाधर्म्यमाह यदेव हंसद्वंद्वं दोषाद्दोषमध्यात् गुणममलं निर्मलमादत्ते अविद्यासंपर्कर
यं दोषं विनाश्य गुणमखंडं कुलानंदरूपं तान्यनंतानि तथा क्षीरोजलात्पयोगुणमिवेत्यर्थः पूजाक्रमस्तु
कोटीत्येव ॐमप्राप्ततेजस्तत्त्वदेवदेव्यावाह १९ तव [illegible] विधाने तत्त्वरमधिष्ठायनिरंतं तमोउहं
वर्ज्जजननिमहतीतांचरणं [illegible] यदार्तालोकान्दहति महति क्रोधकलिते दयार्द्रात्वदृष्टिः शिशिर
मुपचारं रचयति २० हे जननि त्वदधिष्ठितेस्वाधिष्ठाने नाभिचक्रे दशदलेशांभवजन्मे स्वाधिष्ठान
महिपूरयोः मध्यत्वे परित्यंतत्त्वरमग्निमधिष्ठायनिरंतं स्थितं संवर्त्तं संवर्त्तेश्वरनामानं तं प्रसिद्धं तां प्र

सिद्धां महतीमतिशयितां समयां महासमयसंज्ञकां ईदृशीं लोमियदा लोकेन समाविष्टे लोकांश्च लङ्घ्यांव
नाभिदृशतिसति दयाद्रीकरणको मल्लासिंहत्वाविष्टेतियावत् तेनवसमयालब्धायाद्दृष्टिः शिशिरस्त्र
यांश्रीत्वसंपादनेनगुनपुनरूपजीवनं करोति त्वयैः उपासनारीतिज्ञोतैः वक्रमप्राप्यरश्मिमुख्यरे
वदेयो प्राह ३९ तत्त्रिन्वतंघा मातिमिरपरिपंथिन्यु नानारत्नाभरणपरिणाहुं दूधन्युधं नमः २
स्यामं मेघं जननिमहिपूरेकप्रारणं निघवंवर्षितं स्मरानिदिरतं त्रिभुवनं ४०॥ किमव्यनि
वैचनीयं तेजननिमहिपूरेकप्रारणं घट्टदलेनदधावर्तिकमल्लमेवकप्रारणं त्यतंयस्तमोवतस्या
मंकसमवर्गि मेघं मेघस्वर मन्तेस्वरापरपर्यायं मेघनामानं निघेवकीदृशांश्च नामत्वेस्वर्यपरनामधे
यवतिदृहं तसौदामिनीमनोतैतिमिराणमंधकाराणमन्त्रानानांवापरिपंथिनाशकंसर्वांकांतियित्वा
लपाधुनः कीदृशं नानारत्नाभरणपरिणाहुमिंदूधनुर्येन तंपुनः कीदृशं तरत्रूपेणप्राग्नंसंवर्तेस्वरेण
मिहिरेणसूर्येण तप्तं तापितं श्रीतभीविन्धयीदृधिधातेनिद्रांत्रिभुवनं तेजोकवर्षितं सिंचंतं कामप्रा
सपार्थिवराष्ट्रिभुरयदेवदेव्यावार ४ तवाधारमूले सरसमम्पपालालव्यरया नमामानंवेदं
नवरसममहातां उवर्बुनंटं आम्यामतास्या कुसुमयविधिमर्दिप्रपद्पयासनायाम्पांजतेनव
कजननीमजगदिदं ४२॥ नवलदधिपितेमूलेप्राधारे चलद्दलचक्रमूलाधारचक्रेलासंग्रहार

सौ· टी· २२

रसोचितनत्यंततरयास्मयाख्यशक्त्यासहनवात्मानंनवकूटमत्ताविद्यात्मकं यद्वापूर्वोक्तनवव्यूहरू
पंनवखंडनाथात्मकं वा वक्तनोनवरसरूपं रसैर्वैरसतीतिश्रुतिः नवरसाश्रमिनयाप्रज्ञाद्भुतंय
न्महांतां रवंत्कत्यविशेषः तस्यनटमभिनायकं वंदेमन्ये इत्यपिपाठः एताभ्यामुभाभ्यांलास्यता
दिनाथाभ्यांयुक्ताभ्यामित्यर्थः महासंहारानंतरंजगदुत्पत्तिसमनुसंधायदयमानाप्याभ्यांलि
दृशोमीलिताभ्यांगृहेणयथापूर्वंजगदुत्पन्नंविलोक्यातः स्वसंतोषेणलास्यतांडवसमन्वकाभ्यां
देवदेवीभ्यांजगदिदंमातापितृमज्जातं मातापितरावपिपुत्रेजातेसतिसंतोषातिप्रायेणनत्यतेइ
तिभावः इदानींमुकुटादिवर्णनमंगलोपतिहृतेमणिमयत्वं गगनमणिभिः सांद्रघटितं किरीटं
तेहैमंहिमगिरिसुते कीर्तयत्नुकः नमीडेयच्छायाच्छुरणशबलं चंद्रशकलं धनुः शौनासीरंकि
मिदमनुबध्नातिधिषणः ४२॥ श्री॥ हे हिमगिरिसुते हैमंस्वर्णघटितं किरीटं कः कीर्तयन्न
प्यापितमीडेस्तोमि माणिक्यत्वंरत्नविशेषभावं गतैः प्राप्तैर्गगनमणिभिर्द्वादशादित्यैर्मतैर्वव्रु
णादिनामकैः सांद्रघटितं स्निग्धतया योजितं तस्य पश्यमुकुटस्य च्छायाच्छुरणेनकांतिविलेपनेन
शबलं नानावर्णं चंद्रशकलं कलंकरहितो नासीरं शुनासीरः इंद्रस्तस्यायं धनुः कार्मुकं किमेतदिति
धिषणा बुद्धिंजनयतीत्यर्थः ४२ धनोत्पांतानस्तिमितदलितेंदीवरवनं घनस्निग्धंश्लक्ष्णं तव कुरनि २१

कुसुमं तव शिवे यदीयं सौरभ्यं सहजमुपलब्धुं सुमनसो वसंत्यस्मिन्मन्ये वलमथनवाटीविटपिनां ४३ ॥ हे शि
वे तव चिकुरनिकुरुंबं अलकसमूहो नोस्माकं ध्वांतमज्ञानं धुनोतु नाशयतु कीदृशं तुलितमुप
सितं विकसितं यदिंदीवरं श्यामकमलं तस्य वनं येन तत् घनं निबिडं च तत्स्निग्धं चिकुणं चेति तत्त
स्मपरस्तत्तारीयं पदीयं चिकुरनिकुरुंबं भीयं सौरभ्यं सौगंध्यं सहजं स्वाभाविकं उपलब्धुं प्राप्तुं वल
मथनस्येंद्रस्य वाटीनंदनवनं तत्रत्ये विटपिनः कल्पवृक्षाः तेषां सुमनसः पुष्पाणि तत्र तव चिकुरनि
कुरुंबे वसंतीति मन्ये ४३ वहंती सिंदूरं प्रबलकबरीभारतिमिरत्विषां वृंदैर्बंदीकृतमिव नवीनार्ककिरणं ॥
तनोतु क्षेमं नस्तव वदनसौंदर्यलहरीपरीवाहस्रोतःसरणिरिव सीमंतसरणिः ४४ ॥ तव सीमंतसरणिर
द्विधाकृतकेशपाशमध्यरेखा पद्धति नोस्माकं क्षेमं कल्याणं वितनोतु विस्तारयतु कीदृशी सिंदूर
वहंती कमिव प्रबलो बलिष्ठः कबरीभारः केशपाशः स एव तिमिरमंधकारस्तस्य त्विषां कांतीनां वृं
दामिति पाठे तिमिररूपराशीनां वृंदैः समूहैर्बंदीकृत्य विजित्य गृहीतं नवीनार्ककिरणमिव बाला
दित्यमयूखमिव पुनः कीदृशी तव वदनस्य यत्सौंदर्यलहरी लावण्यतरंगस्तस्य परीवाहार्थं यत्स्रोत
स्तस्य सरणिः प्रणालिकेव परीवाहो नाम उद्धृतजलस्य वहिस्सारणं तेन सौंदर्यस्यात्यंतपरिपूरित
त्वं ध्वन्यते ४४ अरालैः स्वाभाव्यादलिकुलसमश्रीभिरलकैः परीतं ते वक्त्रं परिहसति पंकेरुहरुचिं दर

सौं. टी. २२

स्मेरे यस्मिन्दशनरुचिकिंजल्करुचिरे सुगंधौ माद्यंति स्मरदहनचक्षुर्मधुलिहः ४५ ॥ अलकैः कुंतलैः
परीतं वेष्टितं ते तव वक्त्रं मुखं कर्त्तृ कमलकांतिं तिरस्करोति कैः दृशैः स्वाभाव्यात् स्वभावादरालैः कुटि
लैः चतुर्वर्णादिभ्य उपसंख्यानमिति स्वार्थे ष्यञ् वैशिष्ट्यं तस्यापरपरिभावकत्वमुचितमेवेति ध्वनिः
पुनः कीदृशैः अलिकुले भ्रमरसमूहं हसंती श्रीः शोभा येषां अलिकुलवत् श्रीभिरिति पाठे अलिकुल
समानकांतिभिरित्यर्थः अलिकलभश्रीभिरिति पाठे अलिबालकसमप्रभैरित्यर्थः यस्मिन्नव
मैस्मरदहनस्य शंभोश्चक्षुरेव मधुलिहो भ्रमरा माद्यंति कीदृशे दरस्मेरे ईषद्विकसिते दशनरु
चयो दंतकांतय एव किंजल्कानि केसराणि तै रुचिरे मनोज्ञे सुगंधौ सौरभ्यशालिनि ४५ ललाटं
टं लावण्यद्युतिविमलमाभाति तव यत् द्वितीयं तन्मन्ये मुकुटघटितं चंद्रशकलं विपर्यासन्या
सादुभयमपि संभूय च मिथः सुधालेपस्यूतिः परिणमति राकाहिमकरः ४६ ॥ तव ललाटं लावण्येन
सौंदर्येण द्युत्या कांत्या च विमलं यदाभवति तव मुकुटशशिशिखंडस्य द्वितीयं सकलं मन्ये तत्र
हेतुमाह विपर्यासन्यासात् ऊर्ध्वमुखस्य चंद्रखंडस्याधोमुखस्य ललाटस्य वैपरीत्येन न्यासात् उभ
यमपि संभूय संयुज्य मिलितं यदाभाति तदा सुधालेपेन स्यूतिरेकीभावो यत्र स राकाहिमकरः पूर्णि
माचंद्रः परिणमति संपद्यत इत्यर्थः ४६ ॥ भ्रुवौ भुग्ने किंचिद्भुवनभयभंगव्यसनिनि त्वदीये नेत्राभ्यां

मधुकररुचिभ्यां धनगुणे धनुर्मध्ये सव्येतरकरगृहीतं रतिः याति प्रकोष्ठे मधुसख्या गायति निगूढां तरमिदं ४७
हे भुवनमप्रमं गव्यसननिजगद्दृयमंजनश्रीले इमे त्वदीये मधुबोधनुः सव्येतरकरगृहीतं वामहस्तस्थितं निगूढां
तरमाछिंदितमध्यं रतिपतिः कामः प्रकोष्ठे मधुसखोऽस्यागायति आच्छादयंती तिमन्योकीदृशो किंचिद्भुग्ने इषद्वक्रे मधु
कररुचिभ्यां भ्रमरतुल्याभ्यां धनगुणो मौर्वी यत्र तत् ४७ अहरहस्तस्यं तव नयनमकौत्मकतया त्रियामां ता
मंतरुजतिरजनीनायकतया ततावादीरसदरदलितं हसंतुजमचः समायतं संध्यां दिवसनिशयोरंत
चरीं ४८ तव दर्शितानं नयनं अकौतुकतया पिकृत्वा ह्रतौ रहो दिनं स्फुरजतिवामं नयनं रजनीनायकृ
तयाचंद्रत्वा ह्रतौ त्रियामां रात्रिं स्फुरजति तेन तव तृतीयादृष्टि भीलताता किंचकमलकांतिः दिवसनिशयोर्दि
नरात्र्योरंतरचरीं मध्यवर्तिनीं संध्यां समायते जनयति स्फुटः ४८ विशालाकल्याणस्फुरच्चिरदाधाकुवलयः
कृपाधारा धारा किमपि मधुरा मोगवीति का अवंती दृहिलवहुनगरविस्तारविजया ह्रतं तत्तन्नामव्यवहरण
योग्या विजयते ४९ तेन तव दृष्टिर्विजयते इत्यन्वयः कीदृशी वहूनां नगराणां विस्तारस्य विशालत्वगुणस्य वि
जयादभिभवात् तासां तासां नगरीणां व्यवहरणं व्यवहारस्तद्योग्या वहुनगरविस्तारविजयेति पाठे वहूनां
नगराणां विस्तारस्य विजयाय स्यांसेति दृष्टिविशेषणं तत्तन्नामव्यवहरणयोग्यत्वं दर्शयति विशाला विशाली
विलानामनगरी च कल्याणी कल्याणगुणविशिष्टगंधर्वनारी च स्फुरच्चिरविमलकांतिः कुवलयैर्
दृश्यां ... अयोध्या ... अयोध्यानामनगरी च कृपाधारायाः कारुण्यप्रवाहस्याधारभूता

सां. टी. २३

मनगरीव किमपि मधुरा अनिर्वचनीयमनोहरगुणा मथुरानाम कृष्णनगरीति च मधुरा कृष्णनगरी मधुरिमनिर्मितेति विश्वप्र
काशात् भोगवतिकाभोगः प्रेमतरङ्गिणीकः स्वार्थभोगवती पातालनगरीच अवंती भक्तजनं रक्षतीति अवंती नगरीचे
ति ४८ कवीनां संदर्भस्तबकमकरंदैकभरितं कटाक्षव्याक्षेपभ्रमरकुलभोक्तृ कर्णयुगलं अञ्चतेति दृष्ट्वा नयनरस
स्वादतरला वल्लयासंपर्कादलिकनयनैर्नकिंचिदरुणम् ५०॥ नवालिकनयनैलललाटलेखिनेव कर्णिकटाक्षव्या
क्षेपः अपांगविस्फुरणं तावेव भ्रमरकुलभोग्यं द्वारं च बालकोकर्णयुगलमंचतो दृष्ट्वा अस्यास्तत्र गात्रसलल
लाटस्थित मा कर्णपर्यंतगमनाभावेन व्यासंपर्काद्दरुणं रक्तं किंस्विदितर्के किंचिदित्यपि वाचाकं कर्णयुगलं की
दृशं कवीनां व्यासादीनां संदर्भो वाग्गुम्फः स एव स्तबकस्तत्र यो मकरंदः शृंगारादिरसस्तेनैकेन भरितं पूर्णम्
भ्रमरकुलभोक्तृ दृष्टोनवरसास्वादतरलौ शृंगारादिनवरसास्वादलोलुपौ ५० शिवे शृंगारार्द्रा तादिनस्त्र्यवे
कृत्स्नपरा हरं राधा गंगायां गिरिशचरिते विस्मयवती हराहिभ्यो भीता स्मरसिरुहे सौभाग्यजयिनी सखीषु स्मे
राते मपि जयति दृष्टिः सकरुणा ५१॥ हे शिवे शंभौ शृंगाररसेनार्द्रा तद्धितरागस्त्वे अन्यदेवगुरुष्वकृत्स्नपरा
अनेनवीभत्सरसः गंगायां शिवशिरसि वर्तमानायां सापत्न्यात् रोषेति रौद्ररसः गिरिशचरिते परस्यशविर
ह्रीनि लवं ब्रह्मादि धारणरूपे विस्मयवती अनेनाद्भुतरसः हरस्य शिवस्य अहिभ्यो भूषणेभ्यः तसर्पेभ्यो भीता
अनेन भयानकरसः स्मरसिरुहा एणांकमस्तानां जयिनीति वीररसः सखीषु शिवानुरागादिप्रणयपरा
स्मेरा ईषद्धास्यवतीति हास्यरसः मपि हीने सकरुणा कारुण्यरसाविष्टा तव दृष्टिर्विजयते अनेनकरु

णस्य जयतीत्यत्र जननीति पाठे हे जननीति संबोधनं ५१ गते कर्णाभ्यर्णं गरुत इव पक्ष्माणि दधती पुरां भेत्तु
श्चित्तप्रशमरसविद्रावणफले इमे नेत्रे गोत्राधरपतिकुलोत्तंसकलिके तवाकर्णाकृष्टस्मरशरविलासं कलय
तः ५२ गोत्राधरपतिकुलोत्तंसकलिके गोत्रां पृथ्वीं धारयतीति गोत्राधरः पर्वतस्तत्पतिरीश्वरो हिमालयस्त
स्य कुले वंशस्तत्र कलिके भूषणकलिकास्वरूपे तव इमे नेत्रे आकर्णाकृष्टस्मरशरविलासं कलयतः पर्यन्ताकृष्टमार्ग
णस्य शोभां कलयतः धारयतः नेत्रकोटिद्वयं कर्णाभ्यर्णं कर्णनिकटं गते प्राप्ते गरुत इव पक्ष्माणि दधती धारय
ती पुरां भेत्तुः शिवस्य चित्तप्रशमरसविद्रावणफले शान्तिरसदूरीकरणमेव फलं प्रयोजनमेव फलं यत्संपयोरिति
यस्यास्तत्तद्रूपकं ५२ विभक्तत्रैवर्ण्यं व्यतिकरि[illegible]नीलोत्पलनतया विभाति त्वन्नेत्रत्रितयमिदमीशानदयिते
पुनः स्रष्टुं देवान् द्रुहिणहरिरुद्रानुपरतान् रजः सत्त्वं बिभ्रत्तम इति गुणानां त्रयमिव ५३ हे ईशानदयिते शि
वस्य वल्लभे त्वन्नेत्रत्रितयमिदं उपरतान् प्रलयं गतान् द्रुहिणहरिरुद्रान् ब्रह्मविष्णुशिवान् पुनः स्रष्टुं
रजः सत्त्वं तम इति गुणानां त्रयं बिभ्रदिव विभातीति कीदृशं नेत्रत्रयं व्यतिकरनीलाञ्जनतया बद्धकज्जल
तया विभक्तं स्पष्टं त्रिवर्णात्मकं त्रैवर्ण्यं यत्र तत्तथार्थः विभक्तत्रैवर्ण्यं व्यतिकरितनीलाञ्जनमिति क्वचित्पाठः
तत्र विभक्तेन व्यक्तेन त्रैवर्ण्येन वर्णत्रयेण रक्तनीलश्वेतरूपेण व्यतिकरितं संबद्धं यन्नीलाञ्जनं तद्भावे
गुणानां त्रयमिवादिभ्रदित्यन्वयः विष्णोर्नाभिकमलस्य ब्रह्मणश्च नेत्रकमलत्रितयेन ब्रह्म

विभ्रमरूपः हच्छा इति व्यतिरेकालंकारः ५३ तवापर्णकर्णे जय नयनैरयन्यचकिताविलीयंते तोये नितिषमनि
मेघाः शफरिकाः इयं च श्री [illegible] दक्ष्य पाठं [illegible] यं जरा [illegible] निलि [illegible] चापि [illegible] टप्प्र [illegible] ५७॥
रेपर्णे कलि प्राप्य जयत्ताकथयतोलवनवनयोपेक्षन्याचकिताभीताः शफरिकाः प्रोष्ठ्याः नियतं निबि
तं तोयेजले निलीयंते मग्ना भवंति इयं च श्रीः कमलकांतिलव नयनेष्वन्य चकितापक्षेषु प्रातर्नि
मीतदलकपाटं कुवलयकांतिरूपं कमलं जहाति नि [illegible] निशि राज्ञौ विघट्य द्वार प्रविशति तत्के
विरुद्धे जनस्य राज्ञो निमज्जनपातित इति दिवसे कपाटं दत्त्वा पलायते इति लोकप्रसिद्धिः ५४ पवि [illegible]
नः पशुपति पराधीनहृदये [illegible] नयनं [illegible] २
पाणि [illegible] नाम पदनयनं [illegible] ५५॥ हे पशुपति पराधीनहृदये स्वाधीनमानसे अनयेनिष्पा
पेक्षं [illegible] विवीकलैनेत्रैः शोणेन दोगंगा त्रिपथगा नयनं तनयापमूनेति वयाणं
तीर्थानां [illegible] उपनय [illegible] नेत्रैः कीदृशैः [illegible] मित्रे दिये व मित्रं येषां तैः पुनः कीदृ
शैः श्वेतश्यामरुचिभिः रक्तोपशोभकांतिभिः ५५॥ निमेषो [illegible] मदयं यातजग
[illegible] परि [illegible] परि [illegible] नमेषा
[illegible] ५६॥ हे शैलाधिराजसुते तव निमेषोन्मेषाभ्यां प्रतिनिमीलनोन्मीलनाभ्यां जगती एषा प्रल
यं नाशं उदयमुत्पत्तिं याति प्राप्नोति इति संतः प्राहुः त्वदुन्मेषाजनलोचनोन्मीलनत्वाज्जातं प्रादुर्भूतमशे

पंजगत्प्रलयात् संहारात्त्राणं तव दृशः परितनिमीलनादिति शंके तर्कयामीत्यर्थः ५६ दृशा द्राघीय
स्या दरदलितनीलोत्पलरुचा दवीयांसं दीनं स्नपय कृपया मामपि शिवे अनेनायं धन्यो भवति न च ते हानिरियता
वने वा हर्म्ये वा समकरनिपातो हिमकरः ५७ हे शिवे कृपया करुणया मामपि दवीयांसं दूरस्थं दीनं दु
खितं द्राघीयस्या दीर्घतरया दरदलितनीलोत्पलरुचा ईषद्विकसितश्यामसरोजकान्त्या दृशा
दृष्ट्या स्नपय स्नपनेनानेनायं धन्यः कृतार्थश्च पुनर्भवति ते तव इयता हानिः क्षतिर्भवति
वने कानने हर्म्ये गृहे हिमकरश्चन्द्रः समानकरप्रसरः यथा वनस्थस्य गृहस्थस्य वनेन पक्षपातो
न च वा हर्म्यपक्षपातः तथा तवापि निकटस्थेन पक्षपातः दूरस्थेनापि न पक्षपातः समवृत्तिरि
तिभावः ५७ अरालं ते पालीयुगलमगराजन्यतनये न केषामाधत्ते कुसुमशरकोदण्डकुतुकं तिरश्चीनो
यत्र श्रवणपथमुल्लङ्घ्य विलसन्नपाङ्गव्यासङ्गो दिशति शरसंधानधिषणां ५८ हे अगराजस्य तनये पर्वत
राजपुत्रि ते तव अरालं वक्रं पालीयुगलं भ्रूयुगलं केषां जनानां कुसुमशरकुतुकं कामकौ
तुकं नादत्ते न जनयति अपि तु सर्वेषां जनयतीत्यर्थः यत्र पालीयुगले तिरश्चीनो व
क्रः श्रवणपथं कर्णप्रान्तमुल्लङ्घ्य विलसन् शोभमानोऽपाङ्गव्यासङ्गः कटाक्षक्षेपः शरसंधानधि
षणां बाणसंयोजनबुद्धिं दिशति संपादयतीत्यर्थः ५८ स्फुरद्गण्डाभोगप्रतिफलितताटङ्कयुगलं

यत्तुभ्यं मन्येत वक्त्रमिदं मन्मथस्य यमाः ... दुःसाध्यमिति यमं कैर् ... महावीरो मारः प्रथमय यतये तं
जितवान् ५९॥ स्फुरद्दंष्ट्राभोगयोः कपोलस्थलयोः प्रतिफलितं प्रतिबिंबितं ताटंकयुगलं कर्णभूषणविशे
षद्वयं यत्र तत् तादृशं तुभ्यं वक्त्रं मन्मथरथं मन्ये बिंबप्रतिबिंबाभ्यां ताटंकयुगलयोः चक्रद्वयं मन्यमा
नः यो रथं प्रारुह्य महावीरो मारः कंदर्पः प्रमथपतये महादेवाय द्रुह्यति कीदृशाय अर्केन्दुचरणो [illegible] शरीरिच्छ
द्रुपमवनिरथं स्मिरयमानः स्वमात्मानं कामं स्मरं पटं भोक्तुं त्रिपुरमपि जितवते तिरस्कृतवते यमाह द्वौ
ति उभयत्रान्वेति अवनिरथं संश्रितवते रथं संश्रित्य जितवते यो जितवते इत्यर्थः ५९॥ [illegible]
हरीकौ शालरीः पिबंत्याः पार्वत्याः श्रवणपुटकाभ्यामविरतं चमत्कारश्लाघाचलितशिरसः
कुंडलमणेः रणत्कारैः कारैः प्रतिवचनमाचष्टे इव ते ॥६०॥ ते तव कीर्तिसरस्वत्याः सूक्तिपीयूषद्रू
पाः श्रवणचषकाभ्यां अविरतं पिबंत्याः ते तव कुंडलमणेः रणत्कारैः शब्दविशेषैः प्रतिवच
नं प्रत्युत्तरमाचष्टे इव वदति इव कीदृशी कीदृशीः सुधातरंगाणां माधुर्यं हरंती निंदंती इत्यर्थः तव की
दृशाः चमत्कारेण याः श्लाघा साधुवादः तत्कृता सा कीर्त्या तया चलितं कंपितं शिरो यस्याः इत्यर्थः ६०
[illegible] नाशा वंशालिहिमगिरिवंशालिहिनगिरीसंतः ध्वजपटि त्वदीयो नादीपः पल्लवदलम
[illegible] चितं वरभंगतरंगाः शिशिरतरनिःश्वासघटिताः समध्यापयंति अंबा हिरपि च मुक्ता
मणिधरः ६१॥ तुहिनगिरिः हिमाचलस्तस्य वंशोन्वयः तस्य यो ध्वजस्तस्य पटिः पताके त्वदीयो सोना

रावंशस्मात्वं नेदीयो निकटवर्त्ती स्म्यचिंतं त्वद्विम्बियोग्यं फलं च फलनदेशविशेषे वंशान्न्यस्तोन्यत्रि रितिकविसंप्रदा
यमनुसरन्नाह ॥ अन्तरम्यन्तरे शिशिरतरं सत्रिनिपीतम्लेनन निःश्वासेन घटिता निर्मिता मुक्तावलिर्योनासावे
शालासां मुक्तानां सरस्तं संपन्ना वहिरपि बहिः प्रदेशे विनासागम मौक्तिकव्याजेन मुक्तामणिधरो मुक्ताह
यमणिधारकः ॥ ६१ ॥ प्रकृतान्तरस्त्रापालं बदतीदं तवदैदच्छिः प्रवत्येसाद्दृश्यं जनयतु कथं विद्रुमलता
को बिम्बं त्वद्विम्बप्रतिफलनलाभाद्दृश्यते तु लामधारोढं कथमपि नलञ्जेतकलया ॥ ६२ ॥ हेस्नदन्ति प्र
कृत्या स्वभावेन रक्ताया इदं तव स्वस्य चेरधरकान्तेः सादृश्यं प्रवत्स्यविद्रुमलता कथं जनयतु विम्बं कलयेक प्रदेशे
नापि कथमपि कसे न तु लामधारोढुं न तु कुमित दपि कीदृशं विवित्वन्मूर्तिप्रतिविम्बवशाद्रक्तं दृग्विम्बप्रति
फलनलाभादिति किंचित्पाठः तव दृग्बिम्बः स्वयं बिम्बस्तेन प्रतिफलनं पाकस्य लाभादित्यर्थः ॥ ६२ ॥ स्मितान्यो
त्स्नाजालं तव वदनचन्द्रस्य पिबतां चकोराणामासीदिति तया चञ्चुजडिमाऽत्र तत्र शीतांशोरन्तान्त
५८ हरीमन्वय ज्योत्स्ना पिबन्तः स्वरं निशि नीराम्लं कांजिकधिया ॥ ६३ ॥ त्वन्मुखेन्दोः स्मितमेव ज्योत्स्ना
तस्या जालं समूहं पिबतां चकोराणां अत्यन्तमधुरतया चञ्चुजडिमा स्वरस्य चिरासीत् तो हेतोस्तद्विनाशार्थं चकोरा अ
स्माकं चयः कांजिकधिया अम्लं लवणं निशि निशि प्रतिनिशं मन्दमतिशयेन स्वच्छं यथा स्वं शीतांशोश्चन्द्र
स्य सुधासारं पिबन्तीत्यर्थः ॥ ६३ ॥ अविकान्तं पतङ्गैर्गगनकाननजडाननयाः ... क्वाथानजनानि

जिह्वाग्रं जयते यदग्रासीनायाः स्फटिकदृषदच्छच्छविमयी सरस्वत्या मूर्त्तिः परिणमति माणिक्यवपुषा ६४॥
हे जननि निर्विवजिह्वा भक्तना विजयते पत्युः शिवस्य गुणगणकथाया धर्मिता नैवे राग्यैश्वर्यादिजल्पनस्याम्रेडनेव
तैनेजजपउत्तरश्चाद्ग्रहणं वैमुख्येनत्तदेकग्रहणमात्रोपलक्षणं प्रान्तिकाजपापुष्पच्छायापाकृत्रिपुष्पकांतिर्यस्या
जिह्वायाश्च अग्रे आसीनाया उपविष्टायाः सरस्वत्या मूर्त्तिः स्फटिकदृषत् स्फटिकपाषाणं स्वच्छविमला
श्वेताच्छविः कांतिः तद्रूपविषयस्या माणिक्यमणिसमानरूपेण परिणमति ध्वनतरूपतां त्यक्त्वा रक्तरूपतां विध
त्तीति भावः ६४ रणे जित्वा दैत्यानपहृतशिरस्त्रैः कवचिभिर्निवृत्तैश्चण्डांशत्रिपुरहरनिर्माल्यविमुखैः
विशाखेन्द्रोपेन्द्रैः शशिविशदकर्पूरशकला विलीयन्ते मातस्तव वदनताम्बूलकबलाः ६५॥ हे मातस्तव व
रणे युद्धे दैत्यान् देवशत्रून् जित्वा परिभूय अपहृतानि त्यक्तानि शिरस्त्राणि मुकुटानि यैः कवचिभिः धृतकवचैः सि
निवृत्तैः समरतः प्रत्यागतैः चण्डस्य चण्डेश्वरस्य यो भागस्त्रिपुरहरनिर्माल्यं तत्र विमुखैः शिवनिर्माल्यस्याभ
क्ष्यत्वादिति भावः विशाखेन्द्रविष्णुभिः शशिवच्छिशिरः शीतलो यः कर्पूरस्तद्वदुज्ज्वलाः श्वेताः शशिशकलधवला इति
पाठः तत्र शशिशकलं चन्द्रखण्डं कर्पूरं च तद्वदुज्ज्वला इत्यर्थः त्वन्मुखताम्बूलखण्डा विलीयन्ते भक्ष्यन्ते
ते इत्यर्थः ६५ विपञ्च्या गायन्ती विविधमपदानं पशुपतेस्त्वयारब्धे वक्तुं चलितशिरसा साधुवचने त्व
दीयैर्माधुर्यैरपलपिततन्त्रीकलरवां निजां वीणां वाणी निचुलयति चोलेन निभृतं ६६॥ विपञ्च्या वी
णया विविधं नानाप्रकारं पुरारिपौरुषं शास्त्रावधानं निमित्तचरितं गायन्ती वाणी सरस्वती निभृतं यथा स्यात्तथा २६

ह्रीनां च तरुणां चलत्संख्यकानां तव भुजलतानां वातुरवल्लीनां सौंदर्यं शोभां सरसिजभवो ब्रह्मा च तुर्भिर्वद
नैः करणभूतैः स्तोति प्रथमतरलनात्यं च मम कस्य पृथग्मुक्तेनात्र ग्रंथकारिवो महे शास्वनखेभ्यः संचर
स्वन्न विभ्यजवशिखानां च तरुणीमल्लिकानां समं युगपद्वदेव भयस्य भीत्याभावस्यार्पणधिया दा ७०॥
नखानां मयूखद्योतैर्नवनलिनरागं विहसंतीं कराणां तकांतिं कथयथ कथयामः कथममा कदाचिद्धास
स्यं भजतु कलयातं तरु मलेपद्दिकीतु लक्ष्मी वरणतललाता [illegible] ७१। नखानां करजानां म
द्योतिः प्रभाभिर्नवजनशतपत्रशोभां विलसंतीं तिरस्कुर्वंतां तेन तव कराणां कांतिं सौंदर्यं कथं केन प्रका
रेण भीवयं कथयामो वर्णयामः अमिति वा पाठे कांतिविशेषणं उभेति पाठे हंत बोधने कथयत्स्वमे
व वद कौतुकाविहरं त्वाललम्याम्ब्र[illegible]रणतललाक्षापम्लं रंदलेरक्तपत्रं यदि कदाचिन्न दाक मलं कल
यैकदेशोनसास्मै साहृश्यं भजतु अर्थं नान्यथेत्यर्थः कमलं साम्यं तव कराणां हंत दूरे तिष्ठतु कमलानां
तवकरसाम्यं कदाचित्कमेतिभावः ७२ समंदेहीर्कदहुदवदनः करलनयुगं तव दनः खेदं हरतु ताना
प्रस्तुतमुखं यदालोकाशंकाकुलितहृदयो हालजनकः स्वकुंभातरुवेः पार[illegible]तिलसलन मर्दिति ७२
हेदेवि द्योतनशीले समं युगपद्वस्कंदः कुमारो हि पववदनो [illegible] भ्यांपीनमास्वादितं सततप्रस्तु
तमुखं सदा तत्क्षीरमुखं तव स्तनयुगं नोस्माकं खेदं दुःखं हरतु नाशयतु यत्स्तनयुगमालोक्याशंक
यातिकेशाकुलितहृदयं मनोयस्य सः अतएव हालजनकः स्तनयुगे स्वकुंभभ्रमात् हेरंबो गणेशः स्व

कुंभोनिजांगैरहस्तेन कंडूतिरूपश्यतिनिमृतिनवेत्तिएवंविचारयतीतिभावः ७२ [illegible] वदाजा
वमृतरसमाणिक्यकलशो नंदंदेतस्कंदेन गणपतिप्रताके मनासमः पिवंतौ तौ पल्लाद
विदितवधूसंगमरसौ कुमारावद्यापिद्विरदवदनक्रौंचदलनौ ७३ हेनगपतिप्रताके तेनवा
त्वतोजोसनौस्मृतरसस्यमाणिक्यकलशौभवतः नोस्माकंमनसिनसंदेहसंदेहःसंदेहस्ते
शः यस्माकारणात्तौवत्सोजौपिवंतौ गणेशस्कंदौ अद्यापित्वत्स्तनामृतपानादेवतयोर्निजरे
तिभावः कीदृशावत्तातस्त्रीसंभोगसुखावितिति ७३ वक्षोंवक्षोंभेरमदनुजकुंभप्रकृतिभिः समा
रध्वांमुक्तामणिभिरमलांहारलतिकां कुचाभोगिविंबाधररुचिभिरंतःशवलितांप्रतापव्याप्ति
म्रांपुरविजयिनःकीर्तिमिवते ७४ हे वमातस्तवकुचाभोगेमुक्तामणिभिःसमारब्धांघटि
तांश्रमिज्ञां निर्मलांहारलतिकांवहतिमुक्तामणिभिःकीदृशैः स्तंभेरमदनुजोगजासुरस्तस्य
कुंभावेवप्रकृतिर्जन्मस्थानंयेषांतैः लतिकांकीदृशींअधरविंबकांतिभिरंतर्मध्येशवलितां
मिश्रवर्णीकृतांकामिवप्रतापेनलोहितवर्णेनव्यामिश्रांसंगतांपुरंजिजयिनोमहेशस्यकीर्ति
मिवतथाचगजासुरमारणेनयः शिवस्यप्रतापोयाचकीर्तिस्तामिवतवकुचाभोगेविभर्तीतिभा
वः ७४ नवस्त्रंमन्येनलितनगिरिकन्येकुरुपनाः ७५ यः पारावारःपरिवहतिसारस्वतइव

योलेनोपरिस्थवस्त्रेणवीणांलग्नयानिचुलवत्याच्छादयति लग्नाहेतुंनदन्वीणांविशिनष्टि त्वयाचलितशि
रसाकंपितशिरसा साधुवचनेन साधुवादेवचनमारब्धे सति त्वदीये साधुवचनसंबंद्धिमिमांधुर्यैरपल्लयि
तोनितंतनल्लेत्रीणांकलोरवोयस्यालामित्यर्थः ९९ करागोणस्य इत्यहिनगिरिशणावत्सलतयारिरं
शान्नाद्भूतं मदुरधरपानाकुल्लतयाकरगात्रं शंभोर्मिलन्मुकरवतंगिरिसुतेकथंकारंभूमलवचिबु
कमोपमस्पृशति तं ९७ हे गिरिसुते लवचिबुकंकथंकारं केन प्रकारेणबूमो वर्णयामः तत्र हेतुः उपम
रहितं सादृश्यप्रतियोगिन उपमानस्य विरहात् तु हिनगिरिशणा हिमालयेन पृथ्वीलोलेनहलालग्नभोगि
नस्य स्वंगिरीशेन शिवेनाधरपानाकुल्लतयामुहुर्वारंवारमुदानं तं उन्नोलितं शंभोः शिवस्य करगात्रं एक
रंगस्याधोगं मुखमुकरस्यमुखादर्शस्यवृत्तं दंडमित्यर्थः ९० [illegible] कंटक
वंतः [illegible] नालक्षियानं [illegible] श्वेताकालागुरु बहुलजंभालमलिना
सृणा लीलालितं पंचरतिः पदधोलारलतिका ९८ पुरदमयतः प्रियस्य भजाश्लेषादालिंगना
त्कंटकवती पुलकवती तवेयं मुखारविंदस्य नालक्षियेकंरशोभां धत्ते स्वतः स्वभावात् श्वेता कालागुरु
बहुलजंभालेन कुंकुमागुरुसमूपंकेन मिलिता हारलतिका श्रेष्ठाश्राक्ष्यस्मृणालीलालितं पंचवि
शलोभां यद्यस्मात् हरतिधत्ते पदधइत्यत्र तदधइतिपाठः तत्र तदधोग्रीवायाः अधरत्यर्थः ९८ ॥ गलेरेखा

२८

तिरोगतिग्रामनगीते तन्निपुणो विवादव्याख्यानद्वैगुण्यगुणसंख्याप्रतिभुवः विराजंते नानाविधमधुरगानाकरसु
वी त्रयाणां ग्रामाणां स्थितिनियतिसीमान इव ते ६९ हे गतिगमकगीतिकनिपुणे गीतिलक्षणस्वरूपस्तानं त
स्य गमकं आलापकं संगीतशास्त्रे तत्र यानि तत्र निपुणे चतुरे च लक्ष्ये तत्र गतिः रागसंगीतं गमकः स्यापि स्वरस्य
पुनः पुनर्यावर्णगीतं सम्यग्विलासार्थप्रबंधसंदर्भः तदुक्तं गतिलक्षणं रागसंगीतं पश्चादालापः प्रकीर्तितः गमको
मुख्यमादस्य परिभावो रसात्मकः गीतं प्रबंधनं तदर्थं रंजितवाचो ज्ञेयेति तेषु एकचतुरे परमनिपुणे त
व गले तिस्रो रेखाः शोभंते कीदृश्यो विवाहकर्मणि व्याख्यावैविशेषेण बहुल्लिग्गुणो यो मंगलसूत्रं तत्र यात्रित्वसं
ख्याः तस्याः प्रतिभुवो निर्णेत्र्यः तदुक्तं वृत्तविस्तारी सरूपे श्रुवं रचनाचितेलके निरवलंबकाजे हीणां मंगलस्याभ
रणं विदुरिति विवादव्याख्याने जिपाठे विवादार्थव्याख्यानेऽवधायः प्रगुण उत्कृष्टो गुणस्तस्य तस्य यासंख्या प्र
तिभुवः तद्व्यापकः पाठान्तरं प्रतिवादिनोऽगुणबंधनं कुर्वीतीत्याचारः नानाविधानां मधुराणां रागाणां ष
ड्जमध्यमादिसप्तस्वराणां बहुवंशांतगौडगूर्जरकर्णाटादिगीतानामाकार उत्पत्तिः तस्या भूमिरूपाणां त्र
याणां त्रिसंख्यानां षड्जग्राममध्यमग्रामपंचमग्रामाणां स्थितिनियतिसीमान इव परस्परकलहाविर
हानां ग्रामाणां स्थितौ या नियति नियमः तदर्थं सीमान इव मर्यादाचिह्नरूपाणि चेत्यर्थः ६९ मरणात्ति
मग्नानां तव भुजलतानां वनरुहाणां वलयैः सार्द्धं सरसिमध्ये लोतिवदनैः नवेभ्यः संत्रस्य नु प्रथम द
र्शनादंधकारे पोत्कंठातुर्णिव [illegible] णां समभयत्पशमाद्धयानिधया १७०१ मरणात्तीर्वत्सरोमिन्यं कुर्वन्त

२८

ह्यावत्याहं द्रविडशिशुरास्वाद्य तव यत्कवीनां प्रौढानामजनि कमनीयः कवयिता ७५ ॥ हे तुहि
नगिरिकन्ये तव वक्षःस्थलोद्भूतं दुग्धं हृदयतः सारस्वतः सरस्वतीसंबंधी पयःपारावारः क्षीरसमुद्रः
परिवहतीति मन्ये यद्यावत्याः त्वया दत्तं पयस्तन्यं तव द्रविडशिशुर्मल्लनणस्यास्वाद्य प्रौढानां कवीनां
मध्ये कवयिता कविरजनि जात इत्यर्थः तत्र पूर्वं कांचीदेशोत्पन्नि शापाद्द्रविडब्राह्मणः हे स्कंदो वतोक्तिः
सच पितरि देशांतरं गते मातरि च यानीयानयनार्थं गतायां प्रणम्य समयकः प्रांगणे क्षुधया रुदन्नासीत्
१ तस्मिन्नेव काले श्रीकामाक्षी शिवेन सह गच्छन्त्यौ शिव यावत्तिका रुदन्नद्भुत त्वमागत्य स्तन्यमस्मै दत्वांतर्हिता सैव
तद्वधि महाकविर्जात इति किंवदंती ७५ ॥ हर क्रोधज्वालावलिभिरवलीढेन वपुषा गभीरे ते नाभि
सरसि कृतसंगो मनसिजः समुत्तस्थौ तस्माद् चलतनयेधूमलतिका जनस्तां जानीते जननि
भवरोमावलिरिति ७६ ॥ हे पर्वतपुत्रि शिवकोपज्वालासमूहैरवलीढेन व्याप्तेन शरीरेण कंद
र्पः स्वरक्षार्थं तव गंभीरे नाभीसरसि कृतसंयोजात इति शेषः तस्मान्नाभीरसो धूमलतिका तव रो
मावलिरिति मनो जानीते जननीति संबोधनं ७६ ॥ यदेतत्कालिंदीतनुतरतरंगाकृति शिवे कृ
शे मध्ये किंचिज्जननि तव यद्भाति सुधियां विमर्दादन्योन्यं कुचकलशयोरंतरगतं तनूभूतं व्यो
म प्रविशद्विव नाभीकुहरिणी ७७ ॥ हे शिवे हे जननि तव कृशोमध्ये कालिंद्या यमुनायाः तनु

सौं० टी० २९

रोमालिलक्ष्मीपरस्परं गोवीचिलदाकृतितदन्तकालिमंदिनु किं निश्चील नूपाय्यकं वल्गतदन्योन्यं परस्परं कुच
कलशयोर्विमर्दनात्संघर्षणान्निर्भूतं तद्व्योमाकाशं कुहरिणी मध्यं तरंगावीरदेशं कुर्वाणा नाभी
प्रविशद्दिवसाधियं भाती त्यर्थः ७६ ॥ स्थिरो गंगावर्तः स्तनमुकुलरोमावलिलताकलावालं कुंडं
कुसुमशरतेजोहुतभुजः रतेर्लीलागारं किमपि तव नाभी गिरिसुते बिलद्वारं सिद्धेर्गिरिशन
यनानां विजयते ७८ ॥ हे गिरिजे तव नाभी इत्यनेन प्रकारेण विजयते सर्वोत्कर्षेण प्रवर्तते प्रकारमे
वाह स्थिरः स्थैर्यशाली गंगायाः आवर्तो भ्रमिलत्था तेनावेव मुकुलौ यस्याः सा स्तनमुकुला साचासौ
रोमावलिलता रोमराजिरूपिणी वल्ली लतायाः कुलावालं जलधारणार्थं वालविशेषः निजावाल
मिति पाठः निजं स्वीयमालं तदेव स्थानं आलवालमित्यमरः तथा च कुसुमशरः कामस्तस्य तेजोहुत
भुजः प्रतापाग्नेः कुंडं अग्न्यालयः तथा रतेः कामपत्न्याः किमप्यनिर्वचनीयं लीलागारं क्रीडामंदि
रं तथा गिरिशनयनानां महादेवाय पान्मसिद्धेः करणीभूतं बिलद्वारमित्यर्थः ७८ ॥ निसर्गक्षीणस्य
स्तनतटभरेण क्लमजुषो नमन्मूर्तेर्नारीतिलक शनकैस्त्रुट्यत इव चिरं ते मध्यस्य त्रुटिततटि
नीतीरतरुणा समावस्थास्थेम्नो भवतु कुशलं शैलतनये ७९ ॥ हे शैलतनये तव मध्यस्य कुश
लं भवतु कीदृशस्य निसर्गेण स्वभावेन क्षीणस्य कृशस्य तथापि कुचाभोगभारेण क्लेशयुक्तस्य तथा
एव सहिष्णुताविरहेण पुष्टौ भूत वदुधोनम्रो नारीतिलक शनकैर्मंदं मंदं त्रुट्यत इव त्रुटितस्याभो २९

तटिनीतीतरसलेनसमानावस्थानस्याः स्येमास्थितिर्यस्येति ७९ ॥ कुचौस्तव·स्थिरतनयटिकृपीत
भिदुरैककथंतौदोर्मूलंकनककलशाभौकलयतातवत्रालुंभगाडुदूरमवलग्नंतनुभवा त्रिधा
वद्धंदेवि त्रिवलिवलवल्लीभिरिव ८०॥ हेदेवि सद्यस्तलावण्यात्‌ स्थिरयतोर्याविवनमदोस्काणाभि
ववियपानुरागेणवाल्वेदंतुंचतोःलननतटयोधाटितस्यनिवेशितस्यकूर्पासस्यचीनांशुककंचुकस्य
भिदुरैभेरनशीलौदोर्मूलंवाडुमूलहृपंकयंतौव्याप्नुवंतौतवकुचकुलशौस्वर्णकुंभप्रतिमौज
नताकंहर्षेणावलग्नमुदरंभग्नात्रातुरलितंत्रिवलिलवलीवल्लिभिः तिसृभिर्मध्यरेखाभिर्वेलवल्ली
संनिकाभिर्वेल्लिभिर्लताभिर्वद्धमिवपश्य ८०॥ गुरुत्वंविस्तारंक्षितिधरपतिःपार्वतीनिजान्नितंवादाक्षिप्य
त्वयिहरणन्नूपेणनिरधा श्रीतोलेविस्तीर्णगुरुरयमशेषांवहमतीनितंवप्राग्भारःस्थगयतिल
घुत्वंनियतिच ८१॥ हेपार्वतिक्षितिधरपतिःहिमालयोनिजात्मकीयान्नितंवान्कटकप्रदेशा
गुरुत्वंविस्तारंचपृथक्कृत्वत्वयिभवत्याहरणेनरूणाविवाहसमयेदापयेनकरूपेणनिदधे निवेशितवा
न् विवाहादिवृथएवाहरणेचतादिशमरः श्रीतोहेतोर्नितंवप्राग्भारेजघनभारःप्राग्भारश्चेवभारश्च
तथायोतसमधिकः ३॥तविपश्च·विस्तीर्णगुरुगौरववशात्‌ लोश्रुशेषांतर्वीवहवहवंतीपरंथीस्यग

सौ· टी· ३

पतिश्राद्धाद्रयति लघुत्वं लाघवं च प्रापयतीत्यर्थः ॥ करीन्द्राणां शुण्डान् कनककदलीकाण्डपटलीमुभाभ्यामूरुभ्यामु
भयमपि निर्जित्य भवती सुवृत्ताभ्यां पत्युः प्रणतिकठिनाभ्यां गिरिसुते विजिग्ये जानुभ्यां विबुधकरिकुम्भ
द्वयमसि ८२ ॥ हे गिरिसुते उभाभ्यामूरुभ्यां करीन्द्राणां ऐरावतादीनां शुण्डान् हस्तान् कनककदल्याः स्वर्ण
रंभायाः स्तंभसमूहं च उभयमपि उभाभ्यां निर्जित्य सुवृत्ताभ्यां शोभनप्रकारेण वर्तुलाभ्यां पत्युर्महेशस्य प्रण
तिभिः कठिनाभ्यां जानुभ्यां ऐरावतस्य गण्डस्थलमपि भवती त्वं तां विजिग्ये जितवतीत्यर्थः ८२ ॥ पराजेतुं रुद्रं द्विगुण
शरगर्भौ गिरिसुते निषङ्गौ जङ्घे ते विषमविशिखो बाढमकृत । यदग्ने दृश्यन्ते दशशरफलाः पादयुगलीनखाग्र
च्छद्मानः सुरमुकुटशाणैकनिशिताः ॥ ८३ ॥ हे गिरिसुते पूर्वं रुद्रं पराजेतुं विषमविशिखः कामस्तव जङ्घे द्वि
गुणशरगर्भौ स्वयं पञ्चबाणत्वात् एतावद्भिः शरैः रुद्रस्योपमितिर्द्विगुणानेव विजयं पञ्चशरान्विधाय तद्द्वौ भानि
षङ्गौ तूणीरौ बाढं निश्चयेन कृतवान् यदग्ने पयोर्निषङ्गतामापन्नयोर्जङ्घयोरग्ने पादयुगलीनखाग्रच्छद्म
व्याजेन ये ते दशशरफलाः दशसंख्याकबाणानां फलाग्रभागा दृश्यन्ते कीदृशाः नमस्कारसमये महेन्द्रादिमुकु
टकोटिषु शाणात् घर्षणादेकनिशितास्तीक्ष्णीकृता इत्यर्थः ८३ ॥ श्रुतीनां मूर्धानो दधति तव यौ शे
खरतया ममाप्येतौ मातः शिरसि दयया देहि चरणौ । ययोः पाद्यं पाथः पशुपतिजटाजूटतटिनी ययोर्लाक्षा
लक्ष्मीररुणहरिचूडामणिरुचिः ८४ ॥ हे मातः श्रुतीनां वेदानां मूर्धानो तद्भागा उपनिषल्लक्षणा यौ तव च
रणौ कमलिनी शेखरतया ... तां सम्यग्दधति वहन्ति सर्वाहंतां संतीनां त्वच्चरणौ तावेतौ च चरणौ ममापि ३

शिरश्चिकारुणेन स्यापदपयोश्चरणयोः पाद्यं वां गलद्वर्णतद्रूपं याथो जलं पश्यति ज
हाज्ञर तदिनी गंगा तथा पदयोश्चरणयोर्लाक्षालक्ष्मीयावकसंपत् श्वरणोरक्तो हरेर्विष्णो
र्दश्च उमणिर्कुरुटरत्नं तत्परत्वं विदधाति इत्यर्थः ८४ हिमानीहंतव्यं हिमगिरितटाक्रांतिरु
चिरौ निशायां निद्राणं निशि च परभागे च विशदौ परं लक्ष्मीपात्रं श्रियमपि सृजंतौ सम
यिनां सरोजं त्वत्पादौ जननि जयतश्चित्रमिह किं ८५ ॥ हे जननि त्वत्पादौ समग्रगुणसंप
न्नौ नन्ननगुणं सरोजं जयतः अत्र इति किंचित्रं न किमपीत्यर्थः कीदृशं सरोजं हिमानीहंतव्यं
तुहिनसमूहेन नष्टकांति चरणौ कीदृशौ हिमगिरेस्तटाक्रांतौ कटकसंचारे विरुचिरौ विशे
षेण परिहितशोभौ सरोजं निशायां रात्रौ निद्राणं मुद्रितं पादौ तु निशि रात्रौ परभा
गे दिने च रुचिरौ सशोभौ यद्वा परभागेन विरुद्धकांतिसंसर्गेण सशोभौ रात्रौ तमोव
हुलत्वेन श्यामत्वात् चरणयोः सहजयापाटलकांतिं संवहद्यां विरुद्धत्वं परभागो भ
वेद्वर्णद्वयसंसर्गाद्रुचिविधानात् तथा सरोजं परं केवलं लक्ष्म्याः श्रियः पात्रमवस्थि
तं स्थानं न तु तस्या दाने भोगे वा समर्थत्वं त्वत्पादौ तु समयिनां त्वद्भक्तिमार्गप्रवेशिनां श्रि

सौं·
टी·
३२

नीतिकिशलकराग्रेणनवदलनूपहल्लगेणस्वःस्थेभ्यःस्वर्गस्थितेभ्यः स्वपचधनादिमत्तयान्विनेभ्योर
दनांतनूनामित्यस्यविशेषणंचरणौविशिनष्टिदरिद्रेभ्योड मितेभ्योभद्रांसंपूर्णांश्रियंलक्ष्मीमनिशंनि
तरांश्रह्नाय झटिति ददतौ प्रयच्छतावित्यर्थः ८९ ॥ कथाकालेकथयकलितालत्तोरसंपिवमविद्या
थीनवचरणेजनजलेप्रकृत्याम्लानामपिचकविनाकारणेनयापदेदत्तेवासीमुखकमलतां
वत्लरसताम् ९० ॥ हेमातःकथय विद्यार्थीसंतलचरणताल नजैलेकदाकस्मिन्कालेविवेयकी
दशांकलितः प्रक्षालनवेलायांम्लतोरसेमिलितः प्रकृत्याम्लानामपिवनुमशक्तानांक
विनायाःकाव्यस्यकारणेनयारेलतयायज्ञलेवाप्याः सरस्वत्याम्लकमलेनांवत्लरसतांवर्द
नवमलतांवृलराशोभामादत्तेकरोतीत्यर्थः ९० ॥ पदन्यासक्रीडापरिचयमिवालब्धुमनस
स्खलंतस्तेखेलंभवनकलहंसानजहति स्वविक्षेपशिक्षांसुभगमणिमंजीररणितच्छलादाचक्ष
णांचरणयुगलेचारुचरिते ९१ ॥ तेनवचरणयुगलेस्वकुलमतिशयेनचरंतःसंचरंतोगत
रजहंसानजहतिनत्यजंतिकीदृशाः चरणविन्यासलीलाभ्यासेत्रालसंतालब्धुंमनोयेषां
तेत्रालब्धुमनसइवचरणयुगलंकीदृशंसुभगमणिमंजीरस्फारत्नूपुरस्यपदक्वणितंतत
सच्छलात्कपटात्स्वस्यचरणस्यविक्षेपेविन्यासेशिक्षामाचक्षाणंब्रुवाणंपुनःकीदृशंचारु ३२

मनोज्ञं चरितं चरिते तस्यास्ते चारे वृत्तकमिति इति विश्वः चारुचरिते इति संबोधनं वा ९२। अराले
केशेषु प्रकृतिसरलामंदहसिते शिरोभागे इव दिव कठोराकुचतटे अंतर्तन्वी मध्ये पृथु
रपि वरारोहविषये जगत्त्राणं तुभ्यं भोजेपतिकुरुणकाचिदरुण ९२। केशेष्वराला वक्रा मं
दहसिते इषद्धसिते स्वभावेन सरला रज्वी गात्रे शरीरे शिरीषकुसुमवत् कोमला कुचतटे स्तना
भोगे दृषदिव शिलेव कठिना मध्ये उदरे अत्यंतशायेन तन्वी कृशा वरारोहे स्थानि
तंव एव विषये स्थाने पृथुः पृथिमगुणयुक्तः आरोहे जघनं श्रोणि नितंबः स्त्रीकटीतट इति
विश्वः एवंभूता भोमहेशस्य करुणा भवानी रूपा अरुण रक्तवर्णा काचिद्वर्णनीया जग
द्भुवनं त्रातुं रक्षितुं जयति सर्वोत्कृष्टा वर्तते इत्यर्थः ९२। पुरारातेरंतःपुरमसि ततस्त्वच्चरणयोः सपर्या मर्यादा
तरलकरणानामसुलभा तथा ह्येते नीताः शतमखमुखाः सिद्धिमतुलां तव द्वारोपांतस्थिति
भिरणिमाद्याभिरमराः ९३। पुरारातेः शिवस्य त्वमंतःपुरं प्रधानमहिषी असि भवसि अतो हेतोः त
रलकरणानामजितेंद्रियाणां तव चरणयोः सपर्या हा सपर्यायाः पूजायाः मर्यादा रीतिः लभ्य
भाः प्राप्याः दुःसाध्येति तावत् तथापि हं पूर्णं पूजायाः प्रभावः संपूर्णं पूजये वर्णते तरलकर

णारंभादिपरीरंभसंभावितहृदयाः शतमुखमुखोपेंद्रादयोमरादेवालवद्वारोपांतस्थितमित्व
दीयचिंतामणिगृहराजस्यांतिकमदस्यानिविद्याभिरणिमाद्याभिर्दशाभिः सिद्धिंभोगेश्वर्य
संपदमतुलांप्रतिश्रावितानीताः प्रापिताइत्यर्थस्तेत्वत्पूजामात्रात्पदभूत्यर्थः ९१॥ गतास्ते
मंचत्वंद्रुहिणहरिरुद्रेश्वरभृतः शिवः स्वच्छच्छायाकपटघटितप्रच्छदपटः त्वदीयानांभा
सांप्रतिफलनरागारुणतयाशरीरीशृंगारोरसइवदृशांदोग्धिकुतुकं ९२॥ द्रुहिणोब्रह्मा
हरिर्विष्णुः रुद्रः संहर्ता ईश्वरस्तिरोधानकृत् एतैश्चतुर्भिः पा
दरूपैर्धृतोधारितः शिवः सदाशिवोऽनुग्राहकः तेतवमंचत्वंगतः कीदृशः स्वच्छयाशुभ्रया
कायया कांत्याघटितः कपटेन छलेन प्रच्छदपटः आस्तरणपटरूपः सदाशिवस्यास्तरणरू
पत्वात् एतादृशोपिशांकुलकं सर्वंदोग्धिस्वांकं ये नेदशातिकरत्वदीयानांत्वदंगसंग
भृतानां भासां भारत्नकांतीनां प्रतिफलनलाभेन संक्रांतिलाभेनारुणतया पाटलव
र्णतयाशरीरीकृतदेहपरिग्रहः शृंगारोरसइवेत्यर्थः तदुक्तं रुद्रयामले ब्रह्मा विष्णुश्च
रुद्रश्च ईश्वरश्च सदाशिवः एते पंचमहाप्रेताः भूतात्पिपतयेमताः चत्वारो मंचचरणाः पंच

मः शृंगारः पटः संक्षिप्तः काशरूपेण शिवेनाभिन्नविग्रहा नवास्नेहमासीना निर्भरानंदरूपिणीति
शृंगारस्य प्रधानत्वं संगीतशास्त्रे शृंगारः शुचिरुज्ज्वलदर्शनादिना कोपशोभितत्वं यद्यपि अंत
थाप्यनुरागप्रधानरजोगुणमयत्वादरुणतया च वर्णनमित्यवगंतव्यं ९४ ॥ समासीनाः प
संमणिकुट्टिमं वरमणिभूमि यादं तं वंद्रवल्लिमितकिरणश्रेणिमहसः दधाति त्वद्वक्त्रं
निफलतिप्रांतविकचं निरांतकं चंद्राज्जिरहृदयपंकेरुहमिव ९५ ॥ कलंकः कस्तूरी
रजनिकरबिंबं जलमयं कलाभिः कर्पूरैः मरकतकरंडं निबिडितं अतस्त्वद्भोगेन
प्रतिदिनमिदं रिक्तकुहरं विधिर्भूयो भूयो निबिडयति नूनं तव कृते ९६ ॥ कलंको लंछ
नं कस्तूरी रजनिकरबिंबं चंद्रमंडलं जलमयं जलस्वरूपं अत एव मरकतकरंडं अतिगंभीर
स्य जलस्य हरितद्युतिः पत्तयिः कलाभिः षोडशसंख्याभिरेव कर्पूरैर्यन्मारकतरंडे निबिडितं कु
ल्पितं त्वद्भोगेन तांबूलखादनरूपेण रिक्तं कुहरं मध्यं यस्य तं विधिर्ब्रह्मा तांबूलकरंडकवासक
मत्वा सेवमानो भूयो भूयः पल्लवद्भोगेन प्रतिपक्षपदेकालांतरकर्दमखरतानादायतव कृते
त्वदर्थं निबिडयति पूरयति इत्युभयपदताधारणोर्थः वलनत्रकल्पकंकोकश्रियं विदुव

कारूपं कलंकं काव्यवादयोरित्यमरः तदेव कस्तूरी वासना विंदुचक्र वासनया वासितस्यैव चक्रांतरस्य सर्वसिद्धिप्रदत्वात् तदुक्तं योगिनीहृदये शून्याकाराद्विसर्गांताद्विंदुप्रस्पंदसंविदः प्रकाशपरमार्थत्वात्स्फुरत्तालहरीयुता प्रसृतं विश्वलहरीस्थानं मातृत्रयात्मकं बैंदवं चक्रमेतस्य त्रिरूपं च पुनर्भवेत् धर्माधर्मौ तथात्मानं मातृमेयौ तथा प्रमा नवयोन्यात्मकं चक्रं चिदाकारं महद्भवेत् इति पुनः कीदृशं रजनिकरबिंबं जलमयममृतमयं चंद्रमंडलरूपं मध्ये त्रिकोणममृतं परमामृतमित्युक्तेः अमृतबीजवकारात्मकमिति वा सुषिः कुहरं रंध्रं सुषिरं विवरः कुहरं रंध्रं मध्ये यस्य तत् अतो अकारमारभ्य कलांत विंदुतस्वरैः तदधिष्ठानकामेश्वर्यादितत्तत्तिथिरूप पंचदशनित्याभिः कर्पूरेण कोतरवासके निविडितं वेष्टितं मरकतकरंडमिति विंदुचक्ररूपकमिदं विंदुचक्रं त्वदंगेन त्वच्छरीरभूतेन एकैकनित्यात्मना प्रतिदिनं प्रतितिथौ चिंत्यते नूनं संभावनायां भृयेभ्यः योनिवत् उपति योजयति अयं भावः पंचदशस्वरयुक्तं त्रिकोणरेखात्रये प्रत्यहं कामेश्वर्यादि चित्रांतानां नित्यानां मध्ये विसर्गरूपाहं दर्याः पूजनं पुनर्मध्ये लोमविलोमक्रमेण

श्रुत्वेमं सपत्नयोः कामेश्वर्या हि विवितानां चित्रादिकामेश्वर्यतानां तत्र यो ये केके स्यात्पदव-
गनाद्युक्रमचेति ॥ ९६ ॥ त्वदेहोद्भूताभिर्घृणिभिरणिमाद्याभिरभितो निषेव्ये नित्ये त्वामह-
मिति सदा भावयति यः किमाश्चर्यं तस्य त्रिनयनसमृद्धिं तृणयतो महासंवर्ताग्नि-
र्विरचयति नीराजनविधिं ॥ ९७ ॥ हे नित्ये स्वदेहोद्भूताभिः स्वशरीरेभ्य आविर्भूताभिर्घृणिभिः कि-
रणरूपाभिरणिमाद्याभिरावरणदेवताभिरभितो निषेव्यां सेव्यमानां त्वामहमिति अभे-
देन यो भावयति त्रिनयनस्य शिवस्य समृद्धिमैश्वर्यं तृणयतस्तृणमिव प्रमाणीकुर्वतस्त-
स्य महासंवर्ताग्निः प्रलयकालाग्निः किरणैरणिमादिभिः यतीति किमाश्चर्यं न कि-
मपीत्यर्थः तदुक्तं कादिमते त्वद्देहोत्थितैस्तेजोभिः किरणैरणिमादिभिः आवृतां त्वामहमि-
ति भावयेत्स्वसमो भवेत् दत्तात्रेयोप्याह अरुणां करुणातरंगिताक्षीं धृतपाशांकुशपुष्प-
बाणचापामणिमादिभिरावृतां मयूखैरहमित्येव विभावये भवानीमिति ॥ ९७ ॥ समुद्भूतस्थू-
लस्तनभरमुरश्चारुहसितं कटाक्षे कन्दर्पाः कतिचन कदम्बद्युति वपुः हरस्य त्वद्भ्रान्तिं म-
नसि जनयामास मदनो भवत्या ये भक्ताः परिणतिरमीषामियमुमे ॥ ९८ ॥ हे उमे वि-
मलाः पुरुषा भवत्यां भक्ता अमीषामुरो वक्षःस्थलं समुद्भूतं स्थूलस्तनभरं समुद्भूतत्वं ग

हृत्तः स्फुरल्लः परिणाहवान्स्तनभरो यत्र तत्र हसितं स्मितं चारु मनोहरं करालेत्रपांगप्रदेशो कयि
चिन्न कृतिपये कंदर्प्यः कामः वपुः शरीरं कंदर्पकुसुमाकारे रोमांचमित्यर्थः हृद्यं परिणति परि
णामसत्कृताः त्वद्रूपा भवंतीति भावः अहो हरस्य शिवस्य मनसि चित्ते त्वदूपं जनयामासजन
यति स्म हरेपि त्वद्रूपालस्याकारान् हृष्टापि विषमसरविसालांगो भवतीति भावः ९८ कल
त्रं वैधात्रं कतिकति भजंते न कवयः श्रियो देव्याः को वा भवति न पतिः कैरपि धनैः महादेवं हि
त्वा न तव सति सतीनामचरमे कुचाभ्यामासंगः कुरवकतरोरप्यसुलभः ९९ ॥ हे सति न केव
लेनाम्नात्वं सतीनामचरमे यतिव्रतानां प्रधानभूते वैधात्रं क्रियान् संबंधि कलत्रं सरस्व
तीं कति कति कवयो न भजंते न कलत्री कुर्वंति यत्किंचित्कवित्वं कुर्वंति ते नैव सरस्व
तीवल्लभत्वं प्राप्नुवंतीत्यर्थः श्रियो देव्या लक्ष्मीदेव्याः पतिः कैरपि किंचिन्मात्रैरपि धनैः
को वा न भवति महादेवं हरं हित्वा विहाय तव कुचाभ्यां पयोधराभ्यामासंगः परिरंभः कुर
वकतरोरप्यतनत्वमालिंगन दोहदिनो वृत्तविशेषस्यासुलभो दुर्लभ इत्यर्थः ९९ ॥
गिरामाहुर्देवीं द्रुहिणगृहिणीमागमविदो हरेः पत्नीं पद्मां हरसहचरीमद्रितनयां ३५
तुरीया कापि त्वं दुरधिगमनिःसीममहिमा महामाये विश्वं भ्रमयसि परब्रह्ममहिषि १००

हे परब्रह्ममहिषि महेशपत्नि महामाये अनाद्यविद्यास्वरूपे द्रुहिणो ब्रह्मा तस्य द्रुहिणस्य पत्नीं गि
रं देवीं सरस्वतीमाम्नायागमविदो वेदविदस्त्वाहुः हरेर्विष्णोः पत्नीं श्रियं पद्मालक्ष्मीमाहुः त्वमतमा
हत्वं काप्यनिर्वचनीया तुरीया सरस्वत्यादित्रयातिरिक्ता दुरधिगमो दुर्ज्ञेयो निःसीमापर्यन्तो म
हिमा प्रभावो यस्याः सा विश्वं प्राणिजातं भ्रमयसि स्वकीयनानारूपप्रदर्शनेन सरस्वत्यादिबु
द्धिं लोके करोषीत्यर्थः १०० सरस्वत्या लक्ष्म्या विधिहरिसपत्नो विहरते रतेः पातिव्रत्यं शिथि
लयति रम्येण वपुषा। चिरं जीवन्नेव क्षपितपशुपाशव्यतिकरः परानन्दाभिख्यं रसयति रसं
त्वद्भजनवान् १०१। त्वद्भजनवान् त्वद्भक्तः सरस्वत्या गद्यपद्यादिरूपया लक्ष्म्या धनसम्पत्त्या वि
हरतीति क्रीडति विधेर्ब्रह्मणो हरेर्विष्णोः सपत्नः समानपत्नीकः सन् रम्येण शोभनेन वपुषा
शरीरेण रतेः कामपत्न्याः पातिव्रत्यं शिथिलयति दूरीकरोति चिरं जीवन्नेव बहुकालमुल्लंघनीयं
कालमुल्लंघ्य वर्तमान एव क्षपितो दूरीकृतः पशुपाशानां पुत्रकलत्रादीनां व्यतिकरः संबन्धो
येन तथा पक्षान्तरे क्षपितः पशूनां पाशबद्धादीनां घृणाशंकादयः पाशास्तेषां व्यतिकरो येन स
तथाभूतः सन् परब्रह्माभिख्यं परब्रह्मसमानामकं रसं रसो वै स इति श्रुतेः रसयति आस्वादय
तीत्यर्थः। तदुक्तं कुलचूडामणौ घृणा शंका भयं लज्जा जुगुप्सा चेति पंचमी कुलं जातिश्च

सां॰ टी॰ ३६

शीलं चास्य शोभा प्रकीर्त्तिता एतैः षाड्गैर्वर्द्धतो निर्विकारो जितेंद्रियः विश्वव्याप्तिमहात्मानःकःमेव
पुरुषो भवेत् १०१ निधेर्नित्यस्मेरे निरवधिगुणो नीतिनिपुणो निराधारस्तानेनियमपरचित्तै
कनिलये नियत्यानिष्ठे निखिलनिगमांतस्तुतिपदे निरातंके नित्ये निगममयममायस्ति
निता १०२॥ निधीयते जगदस्मिन्निति निधिः तेन जगदाधारभूतो त्यर्थः नित्यस्मेरे नित्यस्मितो
ल्लसद्वदने जीवानां मिथ्याभूतजगदावेशनिरीक्षणं स्मितकरणं न तु जगदाधारभूतशरीरस्य
स्मितयोगश्च शरीरिणः इति परस्परविरुद्धं अत्र शरीरि जगदाधारे शरीरस्य स्मितयोगश्च पर
स्परविरुद्धं कथमेकत्र द्वावेवेत्यत आह निरवधिगुणो भक्तानुग्रहापनानारूपगुणविकारे
ण तदवस्थेष्वपपद्यते इति भावः ननु भक्तानुग्रहाय शरीरादिपरिग्रहस्तत्त्वं पंकमिश्रद्राक्षाक्षि
न्यस्येत्यादिभक्तिपुत्रारतम्यमित्यत आह नीतिनिपुणो भक्तानुकूलफलदानदक्षो न हि कर्म
पारतंत्र्यमित्यत आह निराधारस्तानेनिरवद्यं अत्र प्रतिष्ठितं अन्यानधीनं तानमनुग्रा ह्यपयन्तः
ननु साहं ऽय कश्चिदिष्टस्यैव फलदाता केचिदनिष्टफलदाता त्वेकं पंतनवे वैषम्यमित्यत आह
नियमपरचित्तैकनिलये ध्यानपूजादिनियमपरचित्तमात्रस्थिते नतु हि नियमपारतंत्र्यमेवा
त आह नियत्यानिष्ठे नियमादिजन्यादृष्टानपेक्षे एतादृशपांमायकिं प्रामाण्यमित्यत आह॥ ३६

सौं॰ टी॰ ३८

तिवर्द्धितो २०२॥ अर्थं मदीयकौशलतोपि सम्यगर्थांतरं समधिगम्य न निंद्यमेतत् स्वल्पं तदपि भ
वेरवधिसंचरंतः कस्याधामवंति कवयः प्रकृतप्रयाताः भेदानतेजननिजात्मजनाद्दिनेन वै
कुंठनाथपरतापि कृता ह्येतेन मानसभवानि करवाणि तथापि काकुंठितोल्पमपि तेऽकरुणाकरा
ल्ः॥ ॥इति श्रीरामचंद्रविरचिता श्रीमत्परमहंसपरिव्राजकशंकराचार्यविरचितानं
दलहरीटीका समाप्ता ॥ शुभमस्तु भूयात् शिवायनमः ॥ पार्वती माताजी सहाय ॥
माघमासे कृष्णपक्षे तिथौ रविवासरे लिखितं मेरुथारामेण इदं वैष्णव पुस्तकं
यादृशं पुस्तकं दृष्ट्वा तादृशं लिखितं मया यदि शुद्धमशुद्धं वा मम दोषो न दीयते १॥
श्रीरामजी ॥ संवत् १८०९ ॥ श्रीलहर गोविंदपुरमध्ये लिखितम् ॥ सीता माताजी ॥
॥ ॥

निखिलनिगमांतस्तुतिपदे सकलवेदांतेत्वमेव प्रतिपाद्यसे इति भावः स्तुतिपदे इति पाठे वेदांतैः
स्तुतं पदं चरणौ यस्याः इत्यर्थः केन प्रकारेण स्तुतिपदेत्याह निरातंके निर्गतस्त्रातंको बंधुजनिता
भीतिर्यस्याः नित्यकालत्रयावध्येममापीमां स्तुतिं निगमय निगमीकुरु जालकारात्यर्थेषि च वेद
मेवहं प्रतिपन्नां कुर्वित्यर्थः मम स्तुतिं वेत्यनेन प्राप्तं स्वकृतं त्वं स्तुतेरपाकरोति २०२॥ प्रदीपज्वा
लाभिर्दिवसकरनीराजनविधिः सुधासूतेश्चंद्रोपलजललवैरर्घ्यघटना स्वकीयैरंभो
भिः सलिलनिधिसौहित्यकरणं त्वदीयाभिर्वाग्भिस्तव जननि वाचां स्तुतिरिव २०३॥
हे वाचां जननि मातः कास्वपत्वदीयाभिरेव वाग्भिस्तव स्तुतिरियं न मद्वाग्भिरित्यर्थः यथा प्र
दीपज्वालाभिर्दिवसकरस्य सूर्यस्य नीराजनाविधिरारात्रिकाविधानं नतिरस्कलमुवनीत
र्जितध्वांतध्वंसकारस्य भगवतो मार्तंडस्य प्रदीपज्वालाभिः प्रकाश इत्यर्थः सुधासूतेश्चंद्रस्य चंद्रोप
लजललवैश्चंद्रकांतिपानीयबिंदुभिरर्घ्यघटनाऽर्घ्यदानं स्वकीयैर्निजैरंभोभिर्जलैः सलिल
निधेः समुद्रस्य सौहित्यकरणं तृप्तिसंपादनं सौहित्यं तर्पणे तृप्तिरित्यमरः अत्रत्रयपाशाभा
वपि प्रदीपत्वादीनां दृष्टांततानिदर्शनालंकारः तत्पातितस्तुतिदुरूलरं मे तादृशेपेनाक्लिष्टागरवि